अधिगमपरिणाम-आधारितपाठ्यचर्यारूपरेखा

स्नातककार्यक्रमः – वास्तुशास्त्रम्

2025

ज्ञान-विज्ञान विमुक्तये

UGC

विश्वविद्यालय-अनुदान-आयोगः

बहादुरशाह-जफर-मार्गः

नवदेहली – 110002

UGC LOCF Committee (Sanskrit)

Prof. Shrinivas Varakhedi
Chairperson of the committee and Vice-Chancellor, Central Sanskrit University, New Delhi – 110058, ✉ vc@sanskrit.nic.in
Prof. Sukant Kumar Senapati
Vice-Chancellor, Shri Somnath Sanskrit University, Veraval, ✉ sukantsnpt@gmail.com
Prof. Viroopaksha V. Jaddipal
Secretary, Maharishi Sandipani Rashtriya Ved Vidya Pratishthan, Ujjain, ✉ vvjaddipal@gmail.com
Dr. M. V. Natesan
(Retd. Prof.) SSV Kaladi, Kailash Nagar Kolazhy, Biyur, Trichur-10, ✉ natesanskt2000@gmail.com
Dr. Mamta Tripathi
Assistant Professor, Gargi College, University of Delhi, Delhi, ✉ mamtatripathi.jnu@gmail.com

Curriculum Development Committee for B.A. Hons. (Vastu Shastra)

Prof. Deviprasad Tripathi
Chairperson of the Committee and Professor, Shri Lal Bahadur Shastri National Sanskrit University, New Delhi ✉ devi@slbsrsv.ac.in
Prof. P.S.N. RAO
Professor, School of Planning & Architecture, New Delhi, ✉ drpsnrao@hotmail.com
Prof. Ashok Thapaliyal
Professor, Shri Lal Bahadur Shastri National Sanskrit University, New Delhi, ✉ ashokthapliyal@slbsrsv.ac.in
Dr. Pravesh vyas
Asst. Professor, Shri Lal Bahadur Shastri National Sanskrit University, New Delhi, ✉ pravesh@slbsrsv.ac.in
Prof. Dinakar Marathe
Convenor of the committee and Professor, Kavikulguru Kalidas Sanskrit University, Ratnagiri Campus, Ratnagiri, Maharashtra – 415612 ✉ dinkarmarathe@gmail.com

Co-ordination Committee

Dr. G. Surya Prasad
Chief Co-ordinator of the committee and Asst. Professor, Central Sanskrit University, New Delhi – 110058, ✉ dr.gsurya.prasad@csu.co.in
Dr. Yashvant Kumar Trivedi
Asst. Professor, Central Sanskrit University, New Delhi –110058,✉ dr.yashvant.trivedi@csu.co.in
Dr. Awasthi Sailesh Kumar
Asst. Professor Grade, Central Sanskrit University, New Delhi, 110058, ✉ dr.awasthisailesh@csu.co.in
Dr. Kishor Kumar
Asst. Professor Grade, Central Sanskrit University, New Delhi – 110058, ✉ dr.kishor_kumar@csu.co.in
Dr. Deepika Dixit
Asst. Professor Grade, Central Sanskrit University, New Delhi – 110058, ✉ dr.deepikadixit@csu.co.in

विषयसूची

कार्यक्रमस्य परिचयः

(Introduction of the Program)

बी.ए. ऑनर्स् (वास्तुशास्त्रम्) चतुर्णां वर्षाणां कार्यक्रमः विद्यते। अस्मिन् कार्यक्रमे आहत्य अष्टसत्रार्धानि भविष्यन्ति। **अर्हता** - प्राक्-शास्त्री-उपशास्त्री-उत्तरमध्यमापरीक्षोत्तीर्णाः तत्समकक्ष्यपरीक्षोत्तीर्णाः वा छात्राः एन्.टि.ए. द्वारा आयोज्यमानपरीक्षामाध्यमेन उत्तीर्य अस्मिन् बी.ए.आनर्स (वास्तुशास्त्रम्) कार्यक्रमे प्रवेष्टुम् अर्हाः। अत्र अष्टसु सत्रार्धेषु स्वशास्त्रीयपाठ्यक्रमाः **(Major),** स्वशास्त्रसम्बद्धचयनितपाठ्यक्रमाः **(Minor),** बहुशास्त्रीयपाठ्यक्रमाः **(Multi-disciplinary),** मूल्यवर्धनपाठ्यक्रमाः **(VAC),** कौशलाधारितपाठ्यक्रमाः **(SEC)** च भविष्यन्ति।

एतैः साकं अन्तिमसत्रार्धे प्रशिक्षुतासेवा **(Internship)** पाठ्येतरगतिविधयः **(ECA)** लघुशोधप्रबन्धः **(Dissertation)** च भविष्यन्ति।

कार्यक्रमस्य उद्देश्यानि

(Objectives of the Program)

अस्य पाठ्यक्रमस्य उद्देश्यम् एवं प्रकारेण निर्दिष्टं भवति -

1. भारतीयज्ञानपरम्पाराधारेण वास्तुशास्त्रस्य परिचयप्रदानम्।
2. भारतीयसंस्कृतेः विषये ज्ञानप्रदानम्।
3. भारतीयवास्तुपरम्परायाः परिचयप्रदानम्।
4. नैतिकमूल्यानां विषये ज्ञानप्रदानम्।
5. भारतीयजीवनपद्धतौ वास्तुशास्त्रस्य प्रयोगविषये मार्गदर्शनम्।
6. वास्तुरचनादिकौशलविकासाय मार्गदर्शनम्।
7. संस्कृत-आङ्ग्ल-हिन्दीभाषासु सम्भाषणकौशलसम्पादनम्।
8. भारतीयज्ञानपरम्पराविषयेषु शोधदृष्टिप्रदानम्।
9. सङ्गणकद्वारा संस्कृत/शास्त्रसम्बद्धप्रोग्रामिंग् निर्माणे दक्षताप्रदानम्।

कार्यक्रमस्य परिणामाः

(Program Outcomes)

कार्यक्रमस्य परिणामः - 1	**भारतीयमूलानि -** छात्राः भारतीयवास्तुकलादिषु कुशलाः भविष्यन्ति।
कार्यक्रमस्य परिणामः - 2	**भारतीयज्ञानपरम्परा -** भारतीयज्ञानपरम्परायाम् अभिमानवन्तः भविष्यन्ति।
कार्यक्रमस्य परिणामः - 3	**भविष्यवाद्युपागमः** – वास्तुनिर्माणकार्येषु निपुणाः भविष्यन्ति। शिल्पसंवर्धनं सम्पादयिष्यन्ति।
कार्यक्रमस्य परिणामः - 4	**बहुशास्त्रीयम् -** वास्तुशास्त्रे प्रतिपादितान् लोकोपयोगिनः मौलिकान् विषयान् समाजे सप्रमाणं प्रतिपादयितुं समर्थाः भविष्यन्ति।
कार्यक्रमस्य परिणामः - 5	**वृत्तिप्रदानक्षमता -** छात्रान् व्यावसायिक-विश्लेषणात्मकप्रौद्योगिकी-कौशलेन सुसज्जितान् कृत्वा तेषां वृत्तिसामर्थ्यस्य वर्धनम्।

प्रधानानां पाठ्यक्रमाणां कार्यक्रमपरिणामैः सह योजनम्

(PROGRAM OUTCOME MAPPING FOR MAJOR COURSES)

Course Name पाठ्यक्रमनाम	Rootedness भारतीयमूलानि	IKS भारतीय ज्ञान परम्परा	Futuristic भविष्यवादी	Employability वृत्तिप्रदानक्षमता	Value, Skill and Multidisciplinary मूल्यानि, कौशलानि एवं बहुशास्त्रीयपाठ्यक्रमः	Disciplinary Knowledge अध्ययनशाखायाः ज्ञानम्	Difficulty Level काठिन्यस्तरः
वास्तुशास्त्रस्य परिचयः अवधारणा च:	✓	✓	✓	✓	✓	✓	✓
वास्तुशास्त्रस्य प्रमुखाचार्याः ग्रन्थाश्च	✓	✓	✓	✓	✓	✓	✓
भूमिचयनसिद्धान्ताः	✓	✓	✓	✓	✓	✓	✓
वास्तुशास्त्रस्येतिहासः	✓	✓	✓	✓	✓	✓	✓
आयादिसाधनं गृहमेलापकञ्च	✓	✓	✓	✓	✓	✓	✓
वास्तुपदविन्यासः	✓	✓	✓	✓	✓	✓	✓
आवासीयवास्तु	✓	✓	✓	✓	✓	✓	✓
व्यावसायिकवास्तु	✓	✓	✓	✓	✓	✓	✓
धार्मिकवास्तु	✓	✓	✓	✓	✓	✓	✓
वास्तुमुहूर्त्तविचारः	✓	✓	✓	✓	✓	✓	✓
जीर्णोद्धारविमर्शः	✓	✓	✓	✓	✓	✓	✓
चित्रालेखः	✓	✓	✓	✓	✓	✓	✓

देवबेरविधानम्	✓	✓	✓	✓	✓	✓	✓
ग्राम/पुर/नगरनियोजनम्	✓	✓	✓	✓	✓	✓	✓
दुर्ग-राजप्रासाद-देवप्रासादविधानम्	✓	✓	✓	✓	✓	✓	✓
वास्तुनि प्रयोज्याप्रयोज्यविचारः, वास्तुदोषाः तेषां निराकरणञ्च	✓	✓	✓	✓	✓	✓	✓
वृक्षायुर्वेदः दकार्गलञ्च	✓	✓	✓	✓	✓	✓	✓
अर्वाचीनवास्तुकला-सिद्धान्ताः तत्प्रयोगाश्च	✓	✓	✓	✓	✓	✓	✓
शालविधानम् द्वादशतलविधानञ्च	✓	✓	✓	✓	✓	✓	✓
वास्तुमानचित्रनिर्माणम्	✓	✓	✓	✓	✓	✓	✓

गौणानां पाठ्यक्रमाणां कार्यक्रमपरिणामैः सह योजनम्

PROGRAM OUTCOME MAPPING FOR MINOR COURSES

Course Name पाठ्यक्रमनाम	Rootedness भारतीयमूलानि	IKS भारतीय ज्ञान परम्परा	Futuristic भविष्यवादी	Employability वृत्तिप्रदानक्षमता	Value, Skill and Multidisciplinary मूल्यानि, कौशलानि एवं बहुशास्त्रीयपाठ्यक्रमः	Disciplinary Knowledge अध्ययनशाखायाः ज्ञानम्	Difficulty Level कठिनतायाः स्तरः
वास्तुशास्त्रस्य परिचयः मानवजीवने तदुपयोगिता च	✓	✓	✓	✓	✓	✓	✓
आवासीयवास्तुनिर्माणम्	✓	✓	✓	✓	✓	✓	✓
गृहारम्भ-द्वारविन्यास-गृहप्रवेशमुहूर्त्तविमर्शः	✓	✓	✓	✓	✓	✓	✓
वास्तुपरिचयः, प्रयोजनम्, आधुनिक-परिप्रेक्ष्ये चावश्यकता	✓	✓	✓	✓	✓	✓	✓
भूपरीक्षणम्, भूमेराकाराः, शल्योद्धारः दिक्परिच्छेदश्च	✓	✓	✓	✓	✓	✓	✓
वास्तुशास्त्रस्य अन्यशास्त्रैः सह सम्बन्धः	✓	✓	✓	✓	✓	✓	✓
वास्तुनः प्रमुखभेदाः – आवासीय-व्यावसायिक-धार्मिकाः	✓	✓	✓	✓	✓	✓	✓

गृहारम्भः, द्वारविन्यासः, वृक्षविन्यासः, गृहप्रवेशविमर्शश्च	✓	✓	✓	✓	✓	✓	✓
आधुनिकवास्तुकलायाः मुख्यसिद्धान्ताः	✓	✓	✓	✓	✓	✓	✓
वास्तुनि मानचित्रविधानम्	✓	✓	✓	✓	✓	✓	✓
वास्तुनः आकृतिः, स्वरूपं एकद्वित्रि-चतुश्शालविधानं च	✓	✓	✓	✓	✓	✓	✓

वास्तुशास्त्रस्नातकस्य गुणाः

पाठ्यक्रमस्य समापनानन्तरं छात्राः वास्तुशास्त्रचिन्तनस्य, युक्तियुक्तपरीक्षणस्य, प्रभावपूर्णसंवादस्य च कौशलानि अर्जयिष्यन्ति। बी.ए. ऑनर्स् वास्तुशास्त्रपाठ्यक्रमे स्नातकापेक्षिताः निम्नलिखिताः गुणाः भवन्ति –

GA1	भारतीयज्ञानपरम्परायाः संरक्षणम्।
GA2	स्थापत्यकलायाः विकासः।
GA3	प्राचीनग्राम-नगरवास्तुनः अध्ययनपुरस्सरं देशस्य नगरविकासे सहयोगः।
GA4	संस्कृतस्य संस्कृतेश्च सम्पूर्णविश्वे प्रचारः प्रसारः।
GA5	प्राचीनवास्तुविषयाणाम् आधुनिकस्थापत्यविषयैः सह समन्वयः।
GA6	भारतीयज्ञानपरम्परायां मनुष्यलयवास्तु-प्रासादवास्तु-मन्दिरवास्तु-नागरवास्तुविज्ञानस्य च सम्यग्ज्ञापनेन कार्यक्रमोऽयं भारतस्य समग्रविकासे सहकरोति ।

प्रधानपाठ्यक्रमाणां सञ्चयः

क्र.सं.		प्रधानपाठ्यक्रमाः	पाठ्यक्रम-श्रेयोऽङ्कः	पाठ्यक्रम-काठिन्यस्तरः
1.	प्रथमवर्षीयाः प्रधानपाठ्यक्रमाः	प्रधानः 1.1: वास्तुशास्त्रस्य परिचयः अवधारणा चः	4	100-199
2.		प्रधानः 1.2: वास्तुशास्त्रस्य प्रमुखाचार्याः ग्रन्थाश्च	4	100-199
3.		प्रधानः 1.3: भूमिचयनसिद्धान्ताः	4	100-199
4.		प्रधानः 1.4: वास्तुशास्त्रस्येतिहासः	4	100-199
5.		प्रधानः 1.5: आयादिसाधनं गृहमेलापकञ्च	4	100-199
6.		प्रधानः 1.6: वास्तुपदविन्यासः	4	100-199
7.		प्रधानः 1.7: आवासीयवास्तु	4	100-199
8.	द्वितीयवर्षीयाः प्रधानपाठ्यक्रमाः	प्रधानः 2.1: व्यावसायिकवास्तु	4	200-299
9.		प्रधानः 2.2: धार्मिकवास्तु	4	200-299
10.		प्रधानः 2.3: वास्तुमुहूर्त्तविचारः	4	200-299
11.		प्रधानः 2.4: जीर्णोद्धारविमर्शः	4	200-299
12.		प्रमुखः 2.5: चित्रालेखः	4	200-299
13.		प्रधानः 2.6: देवबेरविधानम्	4	200-299
14.	तृतीयवर्षीयाः प्रधानपाठ्यक्रमाः	प्रधानः 3.1: ग्राम/पुर/नगरनियोजनम्	4	300-399
15.		प्रधानः 3.2: दुर्ग-राजप्रासाद-देवप्रासादविधानम्	4	300-399
16.		प्रधानः 3.3: वास्तुनि प्रयोज्याप्रयोज्यविचारः, वास्तुदोषाः तेषां निराकरणञ्च	4	300-399
17.	चतुर्थवर्षीयाः प्रधानपाठ्यक्रमाः	प्रधानः 4.1: वृक्षायुर्वेदः दकार्गलञ्च	4	400-499
18.		प्रधानः 4.2:अर्वाचीनवास्तुकला-सिद्धान्ताः तत्प्रयोगाश्च	4	400-499
19.		प्रधानः 4.3: शालविधानम् द्वादशतलविधानञ्च	4	400-499
20.		प्रधानः 4.4: वास्तुमानचित्रनिर्माणम्	4	400-499

गौणपाठ्यक्रमाणां सञ्चयः

क्र.सं.		गौणपाठ्यक्रमाः	पाठ्यक्रम-श्रेयोऽङ्कः	पाठ्यक्रम-काठिन्यस्तरः
1.	प्रथमवर्षीयाः गौणपाठ्यकमाः	गौणः 1.क.1: वास्तुशास्त्रस्य परिचयः मानवजीवने तदुपयोगिता च	4	100-199
2.		गौणः 1.क.2: आवासीयवास्तुनिर्माणम्	4	100-199
3.		गौणः 1.क.3: गृहारम्भ-द्वारविन्यास-गृहप्रवेशमुहूर्त्तविमर्शः	4	100-199
4.	द्वितीयवर्षीयाः गौणपाठ्यकमाः	गौणः 2.क.1: वास्तुपरिचयः, प्रयोजनम्, आधुनिक-परिप्रेक्ष्ये चावश्यकता	4	200-299
5.		गौणः 2.क.2: भूपरीक्षणं, भूमेराकाराः, शल्योद्धारः दिक्परिच्छेदश्च	4	200-299
6.	तृतीयवर्षीयाः गौणपाठ्यक्रमाः	गौणः 3.क.1: वास्तुशास्त्रस्य अन्यशास्त्रैः सह सम्बन्धः	4	300-399
7.		गौणः 3.क.2: वास्तुनः प्रमुखभेदाः – आवासीय-व्यावसायिक - धार्मिकाः	4	300-399
8.		गौणः 3.क.3: गृहारम्भः, द्वारविन्यासः, वृक्षविन्यासः, गृहप्रवेशविमर्शश्च	4	300-399
9.		गौणः 3.क.4: आधुनिकवास्तुकलायाः मुख्यसिद्धान्ताः	4	300-399
10.	चतुर्थवर्षीयाः गौणपाठ्यक्रमाः	गौणः 4.क.1: वास्तुनि मानचित्रविधानम्	4	400-499
11.		गौणः 4.क.2: वास्तुनः आकृतिः, स्वरूपम् एकद्वित्रि-चतुश्शालविधानं च	4	400-499

प्रथमवर्षः
(प्रधानपाठ्यक्रमाः)

काठिन्यस्तरः 100-199

श्रेयोऽङ्काः - 4
होराः - 60

प्रथमसत्रार्द्धः (Semester – 1)

प्रधानः पाठ्यक्रमः (Major) 1.1: वास्तुशास्त्रस्य परिचयः अवधारणा च

पाठ्यक्रमस्य उद्देश्यानि (Course Objectives)

1. भारतीयवास्तुशास्त्रस्य सामान्यपरिचयप्रदानम्।
2. वास्तुशास्त्रस्य अध्ययनेन प्राप्यमाणानां प्रयोजनानां ज्ञानसम्पादनम्।
3. वास्तुशास्त्रस्य अवधारणायाः मूलतत्त्वानां परिचयप्रदानम्।

अधिगमस्य परिणामाः (Learning Outcomes): अस्य पाठ्यक्रमस्य अध्ययनादनन्तरं छात्राः :–

1. वास्तुशास्त्रस्य परिभाषाः प्रतिपादयितुं सिद्धाः भविष्यन्ति।
2. वास्तुशास्त्रस्य अन्यशास्त्रैः सह सम्बन्धं वर्णयितुं समर्थाः भविष्यन्ति।
3. वास्तुशास्त्रस्य महत्त्वं प्रासङ्गिकतां च निगदितुं दक्षाः भविष्यन्ति।
4. वास्तुशास्त्रे पञ्चमहाभूतानां प्राकृतिकशक्तीनामुपयोगं वर्णयितुं सिद्धाः भविष्यन्ति।
5. वास्तुपुरुषस्य स्वरूपप्रतिपादनं कर्तुं सिद्धाः भविष्यन्ति।
6. गृहादिनिर्माणस्य ध्यातव्यविषयान् वर्णयितुं प्रवीणाः भविष्यन्ति।

श्रेयोऽङ्कप्रारूपम् (Credit Framework)

पाठ्यक्रमकूटाङ्कः (Course Code)	पाठ्यक्रमशीर्षकम् (Course Title)	पाठ्यक्रमस्य श्रेयोऽङ्कविभाजनम् (Credit Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रशिक्षणम्/अभ्यासः (Practical/Pratice)	
प्रधानः पाठ्यक्रमः (Major) 1.1	वास्तुशास्त्रस्य परिचयः अवधारणा च	03	1	0	04

पाठ्यक्रमविवरणम् (Details of Course)

अन्वितिः १. वास्तुप्रवेशः। **श्रेयोऽङ्कः १**

- वास्तुशास्त्रस्य परिभाषा।
- वास्तुनः स्वरूपम्।
- वास्तुशास्त्रस्य उद्देश्यानि।
- वास्तुशास्त्रस्य अन्यशास्त्रैः सह सम्बन्धः।
- वास्तुशास्त्रस्य महत्त्वं प्रासङ्गिकता च।

अन्वितिः २. वास्तुपुरुषसङ्कल्पना। **श्रेयोऽङ्कः १**

- वास्तुशास्त्रे पञ्चमहाभूतानि।
- वास्तुशास्त्रे प्राकृतिकशक्तयः।

- वास्तोष्पतिपरिकल्पना।
- वास्तुपुरुषस्योद्भवः।
- वास्तुपुरुषस्याङ्गे देवताः।
- वास्तुशास्त्रस्य सङ्क्षिप्तविकासक्रमः।

अन्वितिः ३. गृहनिर्माणचिन्तनम्। **श्रेयोऽङ्कः १**

- वास्तुनः व्युत्पत्तिः अर्थश्च।
- वास्तुस्वरूपम्।
- वास्तुनः प्रभेदाः।
- गृहादिनिर्माणप्रयोजनम् आवश्यकता च।
- गृहादिनिर्माणे ध्यातव्यविषयाः।

अन्वितिः ४. **श्रेयोऽङ्कः १**

- अनुशिक्षणम् आन्तरिकमूल्याङ्कनञ्च

निर्धारिताः ग्रन्थाः (Essential/Recommended Readings/Texts)

1. चतुर्वेदी, शुकदेवः, भारतीय वास्तुशास्त्रम्, श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयः, नवदेहली।

सहायकाः ग्रन्थाः (Additional Readings)

1. त्रिपाठी, देवीप्रसादः, वास्तुसारः, दिल्ली : : ईस्टर्न बुक लिंकर्स।
2. थपलियाल, अशोकः, वास्तुप्रवोधिनी, नई दिल्ली : अमरग्रन्थपब्लिकेशन्स।
3. रामनिहोर द्विवेदी, प. श्री, बृहद्वास्तुमाला, (टीकाकारः सम्पादकश्च - अशोकः थपलियालः), नई दिल्ली : अमरग्रन्थपब्लिकेशन्स।
4. विद्याधरः, भारतीय वास्तुशास्त्रस्य इतिहासः, दिल्ली : ईस्टर्न बुक लिंकर्स।
5. झा, जीवनाथः, वास्तुरत्नावली, (व्याख्याकारः - अच्युतानन्दः झा), वाराणसी : चौखम्बा अमर भारती प्रकाशन।
6. देशबन्धुः, गृहवास्तुशास्त्रीयविधानम्, दिल्ली : विद्यानिधिप्रकाशन।
7. टोडरमलः, वास्तुसौख्यम्, (टीकाकारः - प्रवेशव्यासः), जयपुरम् : जगदीश संस्कृत पुस्तकालय।
8. वास्तुशास्त्रविभागः, वास्तुशास्त्रविमर्श शोधपत्रिका, नवदेहली : श्रीलालबहादुरशास्त्री राष्ट्रियसंस्कृतविश्वविद्यालयः।

काठिन्यस्तरः 100-199

श्रेयोऽङ्काः - 4
होराः - 60

प्रधानः पाठ्यक्रमः (Major) 1.2: वास्तुशास्त्रस्य प्रमुखाचार्याः ग्रन्थाश्च

पाठ्यक्रमस्य उद्देश्यानि (Course Objectives)

1. वास्तुशास्त्रस्य अष्टादशप्रवर्तकानां सामान्यपरिचयप्रदानम्।
2. वास्तुशास्त्रस्य प्रसिद्धानां प्रमुखाचार्याणां विषये ज्ञानसम्पादनम्।
3. वास्तुशास्त्रस्य प्रसिद्धमौलिकग्रन्थानां परिचयप्रदानम्।

अधिगमस्य परिणामाः (Learning Outcomes): अस्य पाठ्यक्रमस्य अध्ययनादनन्तरं छात्राः :-

1. वास्तुशास्त्रस्य अष्टादशप्रवर्तकानाम् आचार्याणां विषये वक्तुं प्रभविष्यन्ति।
2. पुराणकर्तुः वास्तुविदः महर्षिवेदव्यासस्य परिचयप्रदाने समर्थाः भविष्यन्ति।
3. वास्तुशास्त्रस्य वराहमिहिरादीनाम् आचार्याणां विषये निगदितुं सक्षमाः भविष्यन्ति।
4. पुराणेषु वास्तुशास्त्रस्य सन्दर्भान् वर्णयितुं शक्ष्यन्ति।
5. वास्तुशास्त्रस्य प्रसिद्धग्रन्थानां परिचयं प्रदातुं कुशलाः भविष्यन्ति।

श्रेयोऽङ्कप्रारूपम् (Credit Framework)

पाठ्यक्रमकूटाङ्कः (Course Code)	पाठ्यक्रमशीर्षकम् (Course Title)	पाठ्यक्रमस्य श्रेयोऽङ्कविभाजनम् (Credit Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रशिक्षणम्/अभ्यासः (Practical/Practice)	
प्रधानः पाठ्यक्रमः (Major) 1.2	वास्तुशास्त्रस्य प्रमुखाचार्याः ग्रन्थाश्च	03	01	0	04

पाठ्यक्रमविवरणम् (Details of Course)

अन्वितिः १. वास्तुशास्त्रप्रवर्तकाः। **श्रेयोऽङ्कः १**

- अष्टादशप्रवर्तकाः।
- वेदव्यासः।
- वराहमिहिरः।
- भोजराजः।
- रामदैवज्ञः।
- टोडरमलः।
- सूत्रधारमण्डनः।

अन्वितिः २. पौराणिकवास्तुग्रन्थाः शास्त्रीयग्रन्थाः च। **श्रेयोऽङ्कः १**

- मत्स्यपुराणम्।
- अग्निपुराणम्।
- विश्वकर्मप्रकाशः।
- विश्वकर्मवास्तुशास्त्रम्।
- मयमतम्।
- मानसारः।
- मुहूर्त्तचिन्तामणिः (वास्तुगृहप्रवेशप्रकरणे)

अन्वितिः ३. वास्तुशास्त्रग्रन्थाः। **श्रेयोऽङ्कः १**

- अपराजितपृच्छा।
- समराङ्गणसूत्रधारः।
- मनुष्यालयचन्द्रिका।
- रूपमण्डनम्।
- वास्तुविद्या।
- बृहत्संहिता (वास्तुविद्याध्यायादयः)

अन्वितिः ४. **श्रेयोऽङ्कः १**

- अनुशिक्षणम् आन्तरिकमूल्याङ्कनञ्च

निर्धारिताः ग्रन्थाः (Essential/Recommended Readings/Texts)

1. विद्याधरः, भारतीय वास्तुशास्त्र का इतिहास, दिल्ली : ईस्टर्न बुक लिंकर्स।

सहायकाः ग्रन्थाः (Additional Readings)

1. वास्तुशास्त्रविभागः, वास्तुशास्त्रविमर्श शोधपत्रिका, नवदेहली : श्रीलालबहादुरशास्त्रीराष्ट्रिय-संस्कृतविश्वविद्यालयः।

काठिन्यस्तरः
100-199

श्रेयोऽङ्काः - 4
होराः - 60

प्रधानः पाठ्यक्रमः (Major) 1.3: भूमिचयनसिद्धान्ताः दिक्साधनञ्च

पाठ्यक्रमस्य उद्देश्यानि (Course Objectives)

1. भूमिभेदानां सामान्यपरिचयप्रदानम्।
2. भूमिचयनसिद्धान्तानाम् अध्ययनेन प्राप्यमाणानां प्रयोजनानां ज्ञानसम्पादनम्।
3. दिक्साधनस्य अवधारणायाः मूलतत्त्वानां परिचयप्रदानम्।

अधिगमस्य परिणामाः (Learning Outcomes): अस्य पाठ्यक्रमस्य अध्ययनादनन्तरं छात्राः :–

1. ग्रामनिवासे शुभाशुभत्वविचारान् वक्तुं सिद्धाः भविष्यन्ति।
2. काकिणीविचारप्रतिपादने समर्था: भविष्यन्ति।
3. भूमेः प्लवविचारप्रतिपादने समर्थाः भविष्यन्ति।
4. भूमेः आकारविषयकविचारान् वर्णयितुं दक्षाः भविष्यन्ति।
5. शल्योद्धारविधीनां प्रयोगं कर्तुं समर्थाः भविष्यन्ति।
6. दिक्साधनविचारान् प्रतिपादयितुं शक्ष्यन्ति।

श्रेयोऽङ्कप्रारूपम् (Credit Framework)

पाठ्यक्रमकूटाङ्कः (Course Code)	पाठ्यक्रमशीर्षकम् (Course Title)	पाठ्यक्रमस्य श्रेयोऽङ्कविभाजनम् (Credit Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रशिक्षणम्/अभ्यासः (Practical/Practice)	
प्रधानः पाठ्यक्रमः (Major) 1.3	भूमिचयनसिद्धान्ताः दिक्साधनञ्च	03	01	0	04

पाठ्यक्रमविवरणम् (Details of Course)

अन्वितिः १. भूमिविचारः। **श्रेयोऽङ्कः १**

- ग्रामनिवासे शुभाशुभत्वविचारः।
- काकिणीविचारः।
- भूमेः रङ्गरूपरसगन्धादिलक्षणानि।
- भूमेः प्लवविचारः।
- भूमेः पृष्ठविचारः ।

अन्वितिः२. भूमेः आकारादिविचारः। **श्रेयोऽङ्कः १**

- वीथिविचारः।

- पैतामहादिवास्तुविचारः।
- भूमेः आकारविचारः।
- भूमेः आकृत्यादिमाध्यमेन शुभाशुभत्वनिर्णयः।
- खातमाध्यमेन भूमेः शुभाशुभत्वम्।

अन्वितिः ३. शल्यविचारः दिक्साधनं च। **श्रेयोऽङ्कः १**

- भूमौ खनने प्राप्तवस्तुफलानि।
- शल्यविचारः।
- शल्योद्धारविधिः।
- दिक्साधनस्य प्रयोजनम्।
- दिक्साधनविधयः।

अन्वितिः ४. **श्रेयोऽङ्कः १**

- अनुशिक्षणम् आन्तरिकमूल्याङ्कनञ्च।

निर्धारिताः ग्रन्थाः (Essential/Recommended Readings/Texts)

1. त्रिपाठी, देवीप्रसादः, *वास्तुसारः,* दिल्ली : ईस्टर्न बुक लिंकर्स।
2. थपलियाल, अशोकः, *वास्तुप्रबोधिनी,* नई दिल्ली : अमरग्रन्थपब्लिकेशन्स।
3. रामनिहोर द्विवेदी, प. श्रीः, *बृहद्वास्तुमाला,* (टीकाकारः सम्पादकश्च – डॉ. अशोकः थपलियालः), नई दिल्ली : अमरग्रन्थपब्लिकेशन्स।

सहायकाः ग्रन्थाः (Additional Readings)

1. चतुर्वेदी, शुकदेवः, *भारतीय वास्तुशास्त्र,* नवदेहली : श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयः।
2. झा, जीवनाथः, *वास्तुरत्नावली,* (व्याख्याकारः – अच्युतानन्दः झा), वाराणसी : चौखम्बा अमर भारती प्रकाशन।
3. देशबन्धुः, *गृहवास्तुशास्त्रीयविधानम्,* दिल्ली : विद्यानिधिप्रकाशन।
4. टोडरमलः, *वास्तुसौख्यम्,* (टीकाकारः – प्रवेशव्यासः), जयपुरम् : जगदीश संस्कृत पुस्तकालय।
5. वास्तुशास्त्रविभागः, *वास्तुशास्त्रविमर्श शोधपत्रिका,* नवदेहली : श्रीलालबहादुरशास्त्री-राष्ट्रियसंस्कृतविश्वविद्यालयः।

काठिन्यस्तरः 100-199	श्रेयोऽङ्काः - 4 होराः - 60

प्रधानः पाठ्यक्रमः (Major) 1.4: वास्तुशास्त्रस्येतिहासः

पाठ्यक्रमस्य उद्देश्यानि (Course Objectives)

1. भारतीयवास्तुशास्त्रस्य सामान्यपरिचयप्रदानम्।
2. संस्कृतवाङ्मये वास्तुशास्त्रसम्बन्धितं ज्ञानसम्पादनम्।
3. वास्तुशास्त्रस्य प्रमुखग्रन्थानाम् आचार्याणाञ्च परिचयप्रदानम्।

अधिगमस्य परिणामाः (Learning Outcomes): अस्य पाठ्यक्रमस्य अध्ययनादनन्तरं छात्राः :-

1. वैदिकवाङ्मये वास्तुशास्त्रस्य स्वरूपप्रतिपादने समर्थाः भविष्यन्ति।
3. सिन्धुसरस्वतीनदीसभ्यताकालीनस्थापत्यस्य स्वरूपप्रतिपादने दक्षाः भविष्यन्ति।
4. प्राचीनभारतीयशासकानां वास्तुकलाविषयकवर्णनं कर्तुं सिद्धाः भविष्यन्ति।
5. वैदिकवास्तुविद्देवतानां प्रतिपादने दक्षाः भविष्यन्ति।
6. वास्तुशास्त्रस्य प्रमुखग्रन्थानामाचार्याणां च परिचयप्रदाने कुशलाः भविष्यन्ति।

श्रेयोऽङ्कप्रारूपम् (Credit Framework)

पाठ्यक्रमकूटाङ्कः (Course Code)	पाठ्यक्रमशीर्षकम् (Course Title)	पाठ्यक्रमस्य श्रेयोऽङ्कविभाजनम् (Credit Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रशिक्षणम्/अभ्यासः (Practical/Practice)	
प्रधानः पाठ्यक्रमः (Major) 1.4	वास्तुशास्त्रस्येतिहासः	03	01	0	04

पाठ्यक्रमविवरणम् (Details of Course)

अन्वितिः १. वैदिक-पौराणिकवाङ्ग्मये वास्तु। **श्रेयोऽङ्कः १**

- भारतीयवास्तुशास्त्रस्य प्राग्वैदिकस्वरूपम्।
- वैदिकवाङ्मये वास्तुशास्त्रम्।
- सिन्धुसरस्वतीनदीसभ्यताकालीनस्थापत्यम्।
- पुराणेषु वास्तुशास्त्रम्।
- रामायणमहाभारतयोः वास्तुशास्त्रम्।
- संस्कृतवाङ्मये वास्तुशास्त्रम्।
- बौद्धसाहित्ये वास्तुतत्त्वानि।
- जैनसाहित्ये वास्तुतत्त्वानि।

अन्वितिः २. राजपूत-मुगल-ब्रिटिशकालीनवास्तुकला। **श्रेयोऽङ्कः १**

- प्राचीनभारतीयशासकानां वास्तुकला (मौर्यकालतः वर्धनसाम्राज्यपर्यन्तम्)
- राजपूतकालीनवास्तुकला।
- मुगलकालीनवास्तुकला।
- मुगलकालीनवास्तुकला।
- ब्रिटिशकालीनवास्तुकला।
- स्वातन्त्र्योत्तरवास्तुकला।

अन्वितिः ३. प्रमुखवास्तुग्रन्थाः प्रवर्तकाश्च। **श्रेयोऽङ्कः १**

- वास्तुशास्त्रस्य प्रमुखग्रन्थानां परिचयः –
  - विश्वकर्मवास्तुशास्त्रम्
  - मयमतम्
  - समरांगणसूत्रधारः
  - अपराजितपृच्छा
  - जयपृच्छा
  - रूपमण्डनम्
  - राजबल्लभवास्तुशास्त्रम्
  - प्रासादमण्डनम्
  - काश्यपशिल्पम्
  - विश्वकर्मप्रकाशः
  - मानसारः
  - मनुष्यालयचन्द्रिका
- वैदिकवास्तुविद्देवताः।
- पौराणिकवास्तुविद्देवाः।
- वास्तुशास्त्रस्य अष्टादशप्रवर्तकाचार्याः।
- वास्तुशास्त्रस्य प्रमुखाचार्याणां परिचयः –
  - नारदः
  - विश्वकर्मा
  - मयः
  - वराहमिहिरः
  - मानसारः
  - रामदैवज्ञः
  - टोडरमल्लः
  - भोजराजः
  - सूत्रधारमण्डनः
  - जीवनाथः।

अन्वितिः ४. **श्रेयोऽङ्कः १**

- अनुशिक्षणम्।

निर्धारिताः ग्रन्थाः (Essential/Recommended Readings/Texts)

1. विद्याधरः, *भारतीय वास्तुशास्त्र का इतिहास,* दिल्ली : ईस्टर्न बुक लिंकर्स।
2. चतुर्वेदी, शुकदेवः, *भारतीय वास्तुशास्त्र,* नवदेहली : श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयः।

सहायकाः ग्रन्थाः (Additional Readings)

1. चतुर्वेदी, शुकदेवः, *भारतीय वास्तुशास्त्र,* नवदेहली : श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयः।
2. थपलियाल, अशोकः *वास्तुप्रवोधिनी,* नई दिल्ली : अमरग्रन्थपब्लिकेशन्स।
3. द्विवेदी, रामनिहोर, प. श्रीः *बृहद्वास्तुमाला,* (टीकाकारः सम्पादकश्च – डॉ. अशोकः थपलियालः), नई दिल्ली : अमरग्रन्थपब्लिकेशन्स।
4. विद्याधरः *भारतीय वास्तुशास्त्र का इतिहास,* दिल्ली : ईस्टर्न बुक लिंकर्स।
5. झा, जीवनाथः *वास्तुरत्नावली,* (व्याख्याकारः – अच्युतानन्दः झा), वाराणसी : चौखम्बा अमर भारती प्रकाशन।
6. देशबन्धुः *गृहवास्तुशास्त्रीयविधानम्,* दिल्ली : विद्यानिधिप्रकाशन।
7. टोडरमलः *वास्तुसौख्यम्,* (टीकाकारः – प्रवेशव्यासः), जयपुरम् : जगदीश संस्कृत पुस्तकालय।
8. वास्तुशास्त्रविभागः *वास्तुशास्त्रविमर्शः,* नवदेहली : श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयः।

काठिन्यस्तरः
100-199

श्रेयोऽङ्काः - 4
होराः - 60

द्वितीयसत्रार्द्धः (Semester – 2)

प्रधानः पाठ्यक्रमः (Major) 1.5: आयादिसाधनं गृहमेलापकञ्च

पाठ्यक्रमस्य उद्देश्यानि (Course Objectives)

1. आय-वार-अंशादीनां सामान्यपरिचयप्रदानम्।
2. गृहमेलापकस्य अध्ययनेन प्राप्यमाणानां प्रयोजनानां ज्ञानसम्पादनम्।
3. गृहायुष्ययोगविचारसम्बन्धितानां मूलतत्त्वानां परिचयप्रदानम्।

अधिगमस्य परिणामाः (Learning Outcomes): अस्य पाठ्यक्रमस्य अध्ययनादनन्तरं छात्राः :-

1. आयस्वरूपस्य तत्प्रयोजनस्य च वर्णने समर्थाः भविष्यन्ति।
2. द्रव्य-ऋण-नक्षत्राणां साधने दक्षाः भविष्यन्ति।
3. तिथि-योग-आयुषां साधने समर्थाः भविष्यन्ति।
4. व्ययसाधने मण्डलसाधने च कुशलाः भविष्यन्ति।
5. गृहमेलापके वर्णादिविचाराणां निरूपणं कर्तुं सिद्धाः भविष्यन्ति।
6. गृहमेलापके गणभकूटादिविचाराणां प्रतिपादनं कर्तुं शक्ष्यन्ति।

श्रेयोऽङ्कप्रारूपम् (Credit Framework)

पाठ्यक्रमकूटाङ्कः (Course Code)	पाठ्यक्रमशीर्षकम् (Course Title)	पाठ्यक्रमस्य श्रेयोऽङ्कविभाजनम् (Credit Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रशिक्षणम्/अभ्यासः (Practical/Practice)	
प्रधानः पाठ्यक्रमः (Major) 1.5	आयादिसाधनं गृहमेलापकञ्च	03	01	0	04

पाठ्यक्रमविवरणम् (Details of Course)

अन्वितिः १. आयादिसाधनम्। **श्रेयोऽङ्कः १**

- आयस्वरूपं तत्प्रयोजनञ्च।
- आय-वार-अंशानां साधनम्।
- द्रव्य-ऋण-नक्षत्राणां साधनम्।
- तिथि-योग-आयुषां साधनम्।
- व्ययसाधनविचारः।
- मण्डलसाधनम्।

अन्वितिः २. गृहमेलापके वर्णादिविचारः। **श्रेयोऽङ्कः १**

- गृहमेलापके वर्णविचारः।
- वश्यविचारः।
- ताराविचारः।
- योनिविचारः।
- ग्रहमैत्रीविचारः।

अन्वितिः ३. गृहमेलापके गणभकूटादिविचारः। **श्रेयोऽङ्कः १**

- गणविचारः।
- भकूटविचारः।
- नाडीविचारः।
- गृहनक्षत्रपरिच्छेदः।
- गृहायुष्ययोगविचारः, गृहस्य परहस्तंगतयोगाश्च।

अन्वितिः ४. **श्रेयोऽङ्कः १**

- अनुशिक्षणम् आन्तरिकमूल्याङ्कनञ्च।

निर्धारिताः ग्रन्थाः (Essential/Recommended Readings/Texts)

1. त्रिपाठी, देवीप्रसादः, *वास्तुसारः,* दिल्ली : ईस्टर्न बुक लिंकर्स।
2. झा, जीवनाथः, *वास्तुरत्नावली,* (व्याख्याकारः – अच्युतानन्दः झा), वाराणसी : चौखम्बा अमर भारती प्रकाशन।
3. रामनिहोर द्विवेदी, प. श्रीः, *बृहद्वास्तुमाला,* (टीकाकारः सम्पादकश्च – डॉ. अशोकः थपलियालः), नई दिल्ली : अमरग्रन्थपब्लिकेशन्स।

सहायकाः ग्रन्थाः (Additional Readings)

1. चतुर्वेदी, शुकदेव, भारतीय वास्तुशास्त्र, नई दिल्ली : श्रीलालबहादुरशास्त्री राष्ट्रीय संस्कृत विश्वविद्यालय।
2. थपलियाल, अशोक, वास्तुप्रवोधिनी, नई दिल्ली : अमर ग्रन्थ पब्लिकेशन्स।
3. देशबन्धु, गृहवास्तुशास्त्रीयविधानम्, दिल्ली : विद्यानिधि प्रकाशन।
4. टोडरमल, वास्तुसौख्यम् (टीकाकारः: प्रवेश व्यास), जयपुर : जगदीश संस्कृत पुस्तकालय।
5. श्रीलालबहादुरशास्त्री राष्ट्रीय संस्कृत विश्वविद्यालय, वास्तुशास्त्रविमर्शः, नई दिल्ली : शोधपत्रिका।

काठिन्यस्तरः 100-199

श्रेयोऽङ्काः - 4
होराः - 60

प्रधानः पाठ्यक्रमः (Major) 1.6: वास्तुपदविन्यासः

पाठ्यक्रमस्य उद्देश्यानि (Course Objectives):

1. वास्तुपदविन्यासस्य प्रयोजन-आवश्यकतयोः ज्ञानप्रदानम्।
2. विविधवास्तुपदविन्यासानां विषये ज्ञानसम्पादनम्।
3. वास्तुपदविन्यासस्य द्वात्रिंशद्भेदानां सामान्यपरिचयप्रदानम्।

अधिगमस्य परिणामाः (Learning Outcomes): अस्य पाठ्यक्रमस्य अध्ययनादनन्तरं छात्राः :-

1. वास्तुपदविन्यासस्य प्रतिपादनार्थं सिद्धाः भविष्यन्ति।
2. पदवास्तुविषयान् अवगम्य तन्निरूपणसामर्थ्यं प्राप्स्यन्ति।
3. सकलादिद्वात्रिंशद्वास्तुपदविन्यासानां प्रतिपादने समर्थाः भविष्यन्ति।
4. वास्तुपदस्थदेवतानां परिचयप्रदातुं शक्ष्यन्ति।
5. वास्तुपदविन्यासे मर्मस्थान-ब्रह्मस्थानयोः वैशिष्ट्यप्रतिपादने कुशलाः भविष्यन्ति।

श्रेयोङ्कप्रारूपम् (Credit Framework)

पाठ्यक्रमकूटाङ्कः (Course Code)	पाठ्यक्रमशीर्षकम् (Course Title)	पाठ्यक्रमस्य श्रेयोऽङ्कविभाजनम् (Credit Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रशिक्षणम्/अभ्यासः (Practical/Practice)	
प्रमुखः पाठ्यक्रमः (Major) 1.6	वास्तुपदविन्यासः	03	00	01	04

पाठ्यक्रमविवरणम् (Detailes of Course)

अन्वितिः १. पदविन्यासः। **श्रेयोऽङ्कः १**

- वास्तुपदविन्यासस्य प्रयोजनम् आवश्यकता च।
- वास्तुपदविन्यासस्य प्रमुखाः भेदाः, तेषाम् उपयोगस्थानानि च।
- वास्तुक्षेत्राकृत्यनुसारेण प्रमुखाः वास्तुपदविन्यासभेदाः।
- सकलादिद्वात्रिंशद्वास्तुपदसंज्ञाः।

अन्वितिः २. पदवास्तुभेदः। **श्रेयोऽङ्कः १**

- चतुःषष्टिपदवास्तु।
- एकाशीतिपदवास्तु।
- शतपदवास्तु।

अन्वितिः ३. वास्तुपददेवता मर्मस्थानविचारश्च। **श्रेयोऽङ्कः १**

- सहस्रपदवास्तु।
- वास्तुपदस्थदेवतानां परिचयः।
- मर्मस्थानविमर्शः।
- ब्रह्मस्थानस्य वैशिष्ट्यम्।

अन्वितिः ४. प्रशिक्षणम्/अभ्यासः। **श्रेयोऽङ्कः १**

- प्रशिक्षणम्/अभ्यासः।

निर्धारिताः ग्रन्थाः (Essential/Recommended Readings/Texts)

1. आचार्यः मयः, मयमतम्, (टीकाकारः – डॉ. शैलजा पाण्डेय), वाराणसी : चौखम्बा सुरभारती प्रकाशन।

सहायकाः ग्रन्थाः (Additional Readings)

1. त्रिपाठी, देवीप्रसाद, *वास्तुसारः*, दिल्ली : ईस्टर्न बुक लिंकर्स।
2. थपलियाल, अशोक, *वास्तुप्रवोधिनी*, नई दिल्ली : अमर ग्रन्थ पब्लिकेशन्स।
3. चतुर्वेदी, शुकदेव, *भारतीय वास्तुशास्त्र*, नई दिल्ली : श्रीलालबहादुरशास्त्री राष्ट्रीय संस्कृत विश्वविद्यालय।
4. झा, जीवनाथ, *वास्तुरत्नावली* (व्याख्याकारः – अच्युतानन्द झा), वाराणसी : चौखम्बा अमर भारती प्रकाशन।
5. द्विवेदी, रामनिहोर पं. श्री, *बृहद्वास्तुमाला* (टीकाकारः तथा सम्पादकः – डॉ. अशोक थपलियाल), नई दिल्ली : अमर ग्रन्थ पब्लिकेशन्स।
6. देशबन्धु, *गृहवास्तुशास्त्रीयविधानम्*, दिल्ली : विद्यानिधि प्रकाशन।
7. टोडरमल, *वास्तुसौख्यम्* (टीकाकारः – प्रवेश व्यास), जयपुर : जगदीश संस्कृत पुस्तकालय।
8. भोजदेव, राजा, *समराङ्गणसूत्रधारः* (सम्पादकः – डॉ. श्रीकृष्ण जुगनू), वाराणसी : चौखम्बा संस्कृत सीरीज़ ऑफिस।
9. भुवनदेव, *अपराजितापृच्छा* (सम्पादकः – डॉ. श्रीकृष्ण जुगनू), दिल्ली : परिमल पब्लिकेशन्स।
10. वास्तुशास्त्र विभाग, *वास्तुशास्त्रविमर्श शोधपत्रिका*, नई दिल्ली : श्रीलालबहादुरशास्त्री राष्ट्रीय संस्कृत विश्वविद्यालय।

काठिन्यस्तरः 100-199

श्रेयोऽङ्काः - 4
होराः - 60

प्रधानः पाठ्यक्रमः (Major) 1.7: आवासीयवास्तु

पाठ्यक्रमस्य उद्देश्यानि (Course Objectives)

1. आवासीयवास्तुनः सामान्यपरिचयप्रदानम्।
2. आवासीयवास्तुनिर्माणाय वास्तुपदविन्यासस्य ज्ञानसम्पादनम्।
3. आवासीयवास्तुनि कक्षविन्यासस्य, गृहं निकषा शुभाशुभवृक्षाणां च परिचयप्रदानम्।

अधिगमस्य परिणामाः (Learning Outcomes): अस्य पाठ्यक्रमस्य अध्ययनादनन्तरं छात्राः

1. आवासीयवास्तुनः महत्त्वप्रतिपादने समर्थाः भविष्यन्ति।
2. आवासीयवास्तुनः प्रमुखभेदानां निरूपणार्थं सिद्धाः भविष्यन्ति।
3. गृहद्वारविन्यासप्रतिपादने निपुणाः भविष्यन्ति।
4. गृहनिर्माणोपकरणानां वर्णने दक्षाः भविष्यन्ति।
5. आवासीयवास्तुनि गृहसज्जाकरणे प्रवीणाः भविष्यन्ति।
6. गृहनिर्माणविषयकान् विचारान् विज्ञाय तन्निरूपयितुं सिद्धाः भविष्यन्ति।

श्रेयोऽङ्कप्रारूपम् (Credit Framework)

पाठ्यक्रमकूटाङ्कः (Course Code)	पाठ्यक्रमशीर्षकम् (Course Title)	पाठ्यक्रमस्य श्रेयोऽङ्कविभाजनम् (Credit Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रशिक्षणम्/अभ्यासः (Practical/Practice)	
प्रधानः पाठ्यक्रमः (Major) 1.7	आवासीयवास्तु	03	01	0	04

पाठ्यक्रमविवरणम् (Details of Course)

अन्वितिः १. आवासीयवास्तु। **श्रेयोऽङ्कः १**

- आवासीयवास्तुनः महत्त्वम्।
- आवासीयवास्तुनः प्रमुखाः भेदाः।
- गृहे हस्तादिमानम्।
- गृहपिण्डसाधनम्।
- एकेन पद्येन आयाद्यानयनम्।

अन्वितिः २. वास्तुपदविन्यासः। **श्रेयोऽङ्कः १**

- गृहमेलापके विचारणीयतथ्यानि।

- आवासीयवास्तुनिर्माणाय वास्तुपदविन्यासः।
- गृहद्वारविन्यासः।
- गृहे वातायन-जल-अङ्गणादिविचारः।

अन्वितिः ३. गृहनिर्माणचिन्तनम्। **श्रेयोऽङ्कः १**

- गृहनिर्माणोपकरणानि।
- गृहनिर्माणे तृणकाष्ठाद्युपकरणविचारः।
- आवासीयवास्तुनि कक्षविन्यासः।
- गृहसज्जा।
- गृहं निकषा शुभाशुभवृक्षाः।

अन्वितिः ४. अनुशिक्षणम् **श्रेयोऽङ्कः १**

- अनुशिक्षणम् आन्तरिकमूल्याङ्कनञ्च।

निर्धारिताः ग्रन्थाः (Essential/Recommended Readings/Texts)

1. त्रिपाठी, देवीप्रसादः, *वास्तुसारः,* दिल्ली : ईस्टर्न बुक लिंकर्स।
2. झा, जीवनाथः, *वास्तुरत्नावली,* (व्याख्याकारः – अच्युतानन्दः झा), वाराणसी : चौखम्बा अमर भारती प्रकाशन।
3. रामनिहोर द्विवेदी, प. श्रीः, *बृहद्वास्तुमाला,* (टीकाकारः सम्पादकश्च – डॉ. अशोकः थपलियालः), नई दिल्ली : अमरग्रन्थपब्लिकेशन्स।

सहायकाः ग्रन्थाः (Additional Readings)

1. चतुर्वेदी, शुकदेवः, *भारतीय वास्तुशास्त्र,* नवदेहली : श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयः।
2. थपलियाल, अशोकः, *वास्तुप्रवोधिनी,* नई दिल्ली : अमरग्रन्थपब्लिकेशन्स।
3. देशबन्धुः, *गृहवास्तुशास्त्रीयविधानम्,* दिल्ली : विद्यानिधिप्रकाशन।
4. टोडरमलः, *वास्तुसौख्यम्,* (टीकाकारः – प्रवेशव्यासः), जयपुरम् : जगदीश संस्कृत पुस्तकालय।
5. वास्तुशास्त्रविभागः, *वास्तुशास्त्रविमर्शः,* नवदेहली :श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयः।

द्वितीयवर्षः

(प्रधानपाठ्यक्रमाः)

काठिन्यस्तरः 200-299

श्रेयोऽङ्काः - 4
होराः - 60

तृतीयसत्रार्द्धः (Semester – 3)

प्रधानः पाठ्यक्रमः (Major) 2.1: व्यावसायिकवास्तु

पाठ्यक्रमस्य उद्देश्यानि (Course Objectives)

1. व्यावसायिकवास्तुनः सामान्यपरिचयप्रदानम्।
2. व्यावसायिकभूखण्डस्य गुणदोषाणां ज्ञानसम्पादनम्।
3. औद्योगिकवास्तुनः परिचयप्रदानम्।

अधिगमस्य परिणामाः (Learning Outcomes): अस्य पाठ्यक्रमस्य अध्ययनादनन्तरं छात्राः :-

1. आधुनिकपरिप्रेक्ष्ये व्यावसायिकवास्तुनः स्वरूपप्रतिपादने समर्थाः भविष्यन्ति।
2. व्यावसायिकवास्तुनः प्रमुखभेदानां निरूपणं कर्तुं शक्ष्यन्ति।
3. औद्योगिकवास्तुनः नियमानां प्रतिपादनार्थं सिद्धाः भविष्यन्ति।
4. वास्तुसम्मतकार्यालयनिर्माणविधौ कुशलाः भविष्यन्ति।
5. विद्यालयादिनिर्माणस्य वास्तुनियमानां वर्णने दक्षाः भविष्यन्ति।
6. व्यावसायिकवास्तुनि सज्जायाः स्वरूपप्रतिपादने कुशलाः भविष्यन्ति।

श्रेयोऽङ्कप्रारूपम् (Credit Framework)

पाठ्यक्रमकूटाङ्कः (Course Code)	पाठ्यक्रमशीर्षकम् (Course Title)	पाठ्यक्रमस्य श्रेयोऽङ्कविभाजनम् (Credit Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रशिक्षणम्/अभ्यासः (Practical/Practice)	
प्रधानः पाठ्यक्रमः (Major) 2.1	व्यावसायिकवास्तु	03	01	0	04

पाठ्यक्रमविवरणम् (Details of Course)

अन्वितिः १. व्यावसायिकवास्तुस्वरूपम्। **श्रेयोऽङ्कः १**

- आधुनिकपरिप्रेक्ष्ये व्यावसायिकवास्तुनः स्वरूपम्।
- व्यावसायिकवास्तुनः महत्त्वम्।
- व्यावसायिकभूमिविचारः।
- व्यावसायिकभूखण्डस्य गुणाः दोषाश्च।
- व्यावसायिकवास्तुनः प्रमुखाः भेदाः।

अन्वितिः २. विविधव्यावसायिकवास्तुविचारः। **श्रेयोऽङ्कः १**

- औद्योगिकवास्तु।
- विपणिकेन्द्रम्।
- कार्यालयविन्यासः।
- चिकित्सालयवास्तु।

अन्वितिः ३. विद्यालयादिवास्तुविचारः सज्जाविचारश्च। **श्रेयोऽङ्कः १**

- विद्यालयादिवास्तु।
- चलचित्रादिवास्तु।
- अतिथिगृहादिवास्तु।
- सज्जाविमर्शः।

अन्वितिः ४. **श्रेयोऽङ्कः १**

- अनुशिक्षणम् आन्तरिकमूल्याङ्कनञ्च।

निर्धारिताः ग्रन्थाः (Essential/Recommended Readings/Texts)

1. चतुर्वेदी, शुकदेवः, *भारतीय वास्तुशास्त्र,* नवदेहली : श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयः।

सहायकाः ग्रन्थाः (Additional Readings)

1. त्रिपाठी, देवीप्रसादः, *वास्तुसारः,* दिल्ली : ईस्टर्न बुक लिंकर्स।
2. थपलियाल, अशोकः, *वास्तुप्रवोधिनी,* नई दिल्ली : अमरग्रन्थपब्लिकेशन्स।
3. रामनिहोर द्विवेदी, प. श्रीः, *बृहद्वास्तुमाला,* (टीकाकारः सम्पादकश्च – डॉ. अशोकः थपलियालः), नई दिल्ली : अमरग्रन्थपब्लिकेशन्स।
4. विद्याधरः, *भारतीय वास्तुशास्त्र का इतिहास,* दिल्ली : ईस्टर्न बुक लिंकर्स।
5. झा, जीवनाथः, *वास्तुरत्नावली,* (व्याख्याकारः – अच्युतानन्दः झा), वाराणसी : चौखम्बा अमर भारती प्रकाशन।
6. देशबन्धुः, *गृहवास्तुशास्त्रीयविधानम्,* दिल्ली : विद्यानिधिप्रकाशन।
7. टोडरमलः, *वास्तुसौख्यम्,* (टीकाकारः – प्रवेशव्यासः), जयपुरम् : जगदीश संस्कृत पुस्तकालय।
8. वास्तुशास्त्रविभागः, *वास्तुशास्त्रविमर्श,* नवदेहली : श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयः।

काठिन्यस्तरः 200-299	श्रेयोऽङ्काः - 4 होराः - 60

प्रधानः पाठ्यक्रमः (Major) 2.2: धार्मिकवास्तु

पाठ्यक्रमस्य उद्देश्यानि (Course Objectives)

1. धार्मिकवास्तुनः स्वरूप-महत्त्व-भेदानां परिचयप्रदानम्।
2. धार्मिकवास्तुनि मन्दिरनिर्माणस्य प्रमुखसिद्धान्तानां ज्ञानसम्पादनम्।
3. मन्दिरस्य मुख्यावयवानां सामान्यपरिचयप्रदानम्।
4. जलाशय-धर्मशालादीनां निर्माणस्य प्रमुखनियमानां ज्ञानप्रदानम्।

अधिगमस्य परिणामाः (Learning Outcomes): अस्य पाठ्यक्रमस्य अध्ययनादनन्तरं छात्राः :-

1. धार्मिकवास्तुनः स्वरूपं प्रयोजनं महत्त्वञ्च वक्तुं प्रभविष्यन्ति।
2. मेरुमन्दरादिविंशतिप्रासादभेदानां परिचयप्रदाने समर्थाः भविष्यन्ति।
3. मन्दिरनिर्माणशैलीनां वैशिष्ट्यप्रतिपादने कुशलाः भविष्यन्ति।
4. मन्दिरस्य प्रमुखावयवानां प्रतिपादने प्रवीणाः भविष्यन्ति।
5. जलाशयवास्तुनः प्रमुखसिद्धान्तान् वर्णयितुं शक्ष्यन्ति।
6. धर्मशालादिवास्तुनः नियमान् वक्तुं समर्थाः भविष्यन्ति।

श्रेयोऽङ्कप्रारूपम् (Credit Framework)

पाठ्यक्रमकूटाङ्कः (Course Code)	पाठ्यक्रमशीर्षकम् (Course Title)	पाठ्यक्रमस्य श्रेयोऽङ्कविभाजनम् (Credit Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रशिक्षणम्/अभ्यासः (Practical/Practice)	
प्रधानः पाठ्यक्रमः (Major) 2.2	धार्मिकवास्तु	03	01	0	04

पाठ्यक्रमविवरणम् (Details of Course)

अन्वितिः १. धार्मिकवास्तुनः स्वरूपं भेदाश्च। **श्रेयोऽङ्कः १**

- धार्मिकवास्तुनः स्वरूपम्।
- धार्मिकवास्तुनः महत्त्वम्।
- धार्मिकभूमिविचारः।
- धार्मिकभूखण्डस्य गुणाः दोषाश्च।
- धार्मिकवास्तुनः प्रमुखाः भेदाः।

अन्वितिः २. मन्दिरवास्तुचिन्तनम्। **श्रेयोऽङ्कः १**

- मन्दिरवास्तुनः व्युत्पत्तिः स्वरूपं महत्त्वञ्च।
- मन्दिरवास्तुनः संक्षिप्तम् ऐतिह्यम्।
- मन्दिरनिर्माणस्य मूलाधाराः।
- मेरु-मन्दरादिविंशतिप्रासादभेदाः।
- मन्दिरनिर्माणस्य शैल्यः।

अन्वितिः ३. मन्दिर -जलाशय-धर्मशालावास्तुसिद्धान्ताः। **श्रेयोऽङ्कः १**

- मन्दिरस्य प्रमुखाः अवयवाः-
    - जगती।
    - पीठम्।
    - मण्डोवरः।
    - द्वारम्।
    - मण्डपाः।
    - गर्भगृहम्।
    - शिखरम्।
    - ध्वजा।
- जलाशयवास्तुनः प्रमुखसिद्धान्ताः।
- धर्मशालावास्तुनः प्रमुखसिद्धान्ताः।
- प्रकीर्णविषयाः।

अन्वितिः ४. **श्रेयोऽङ्कः १**

- अनुशिक्षणम् आन्तरिकमूल्याङ्कनञ्च।

निर्धारिताः ग्रन्थाः (Essential/Recommended Readings/Texts)

1. सूत्रधारमण्डनः, *प्रासादमण्डनम्,* (सम्पादकः – श्रीकृष्णः जुगनू), दिल्ली : परिमल प्रकाशन।
2. देशबन्धुः, *देवालयस्थापत्यम्,* दिल्ली : श्रीकृष्णसाहित्यसदनम्।
3. चतुर्वेदी, शुकदेवः, *भारतीय वास्तुशास्त्र,* नवदेहली : श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयः।

सहायकाः ग्रन्थाः (Additional Readings)

1. वराहमिहिरः, *बृहत्संहिता,* (सम्पादकः – अच्युतानन्दः झा), वाराणसी : चौखम्बा सुरभारती प्रकाशन।
2. त्रिपाठी, देवीप्रसादः, *वास्तुसारः,* दिल्ली : ईस्टर्न बुक लिंकर्स।
3. थपलियाल, अशोकः, *वास्तुप्रवोधिनी,* नई दिल्ली : अमरग्रन्थपब्लिकेशन्स।

4. मयः, आचार्यः, *मयमतम्,* (टीकाकारः – डॉ. शैलजा पाण्डेय), वाराणसी : चौखम्बा सुरभारती प्रकाशन।
5. झा, जीवनाथः, *वास्तुरत्नावली,* (व्याख्याकारः – अच्युतानन्दः झा), वाराणसी : चौखम्बा अमर भारती प्रकाशन।
6. रामनिहोर द्विवेदी, प. श्रीः, *बृहद्वास्तुमाला,* (टीकाकारः सम्पादकश्च – डॉ. अशोकः थपलियालः), नई दिल्ली : अमरग्रन्थपब्लिकेशन्स।
7. टोडरमलः, *वास्तुसौख्यम्,* (टीकाकारः – प्रवेशव्यासः), जयपुरम् : जगदीश संस्कृत पुस्तकालय।
8. वास्तुशास्त्रविभागः, *वास्तुशास्त्रविमर्श (शोधपत्रिका),* नवदेहली : श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयः।

काठिन्यस्तरः 200-299

श्रेयोऽङ्काः - 4
होराः - 60

प्रधानः **पाठ्यक्रमः (Major) 2.3: वास्तुमुहूर्तविचारः।**

पाठ्यक्रमस्य उद्देश्यानि (Course Objectives)

1. वास्तुमुहूर्तानां सामान्यपरिचयप्रदानम्।
2. इष्टिकादिनिर्माणगृहारम्भादिमुहूर्तानां गुणदोषाणां ज्ञानसम्पादनम्।
3. गृहप्रवेशस्य भेदानां परिचयप्रदानम्।

अधिगमस्य परिणामाः (Learning Outcomes): अस्य पाठ्यक्रमस्य अध्ययनादनन्तरं छात्राः :–

1. गृहारम्भमुहूर्त्तानां विमर्शनं कृत्वा तत्प्रतिपादयितुं सिद्धाः भविष्यन्ति।
2. काष्ठसङ्ग्रहण-वृक्षारोपण-वृक्षच्छेदनादिमुहूर्तानां प्रतिपादने समर्थाः भविष्यन्ति।
3. गृहप्रवेशस्य भेदानां वर्णने दक्षाः भविष्यन्ति।
4. गृहप्रवेशे कलशचक्रशुद्धिप्रतिपादने प्रवीणाः भविष्यन्ति।
5. जीर्णोद्धारमुहूर्तान् प्रतिपादयितुं सिद्धाः भविष्यन्ति।

श्रेयोऽङ्कप्रारूपम् (Credit Framework)

पाठ्यक्रमकूटाङ्कः (Course Code)	पाठ्यक्रमशीर्षकम् (Course Title)	पाठ्यक्रमस्य श्रेयोऽङ्कविभाजनम् (Credit Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रशिक्षणम्/अभ्यासः (Practical/Practice)	
प्रधानः पाठ्यक्रमः (Major) 2.3	वास्तुमुहूर्तविचारः	03	01	0	04

पाठ्यक्रमविवरणम् (Details of Course)

अन्वितिः१. पञ्चाङ्गपरिचयः गृहारम्भमुहुर्तचिन्तनञ्च। **श्रेयोऽङ्कः १**

- पञ्चाङ्गस्वरूपविवेचनम्।
- मुहूर्त्तशब्दस्य व्युत्पत्तिः अर्थः स्वरूपञ्च।
- वास्तुमुहूर्त्तानां महत्त्वं प्रभेदाश्च।
- खातविमर्शः राहुमुखविचारश्च।
- गृहारम्भमुहूर्त्तः।
- गृहारम्भे वृषवास्तुचक्रशुद्धिविमर्शः।

अन्वितिः २. इष्टिकादिनिर्माणमुहूर्तविचारः। **श्रेयोऽङ्कः १**

- इष्टिकादिनिर्माणमुहूर्त्तः।
- काष्ठसंग्रहणमुहूर्त्तः वृक्षरोपणमुहूर्त्तः वृक्षच्छेदनमुहूर्त्तश्च।

- द्वारस्थापनमुहूर्त्तः कपाटस्थापनमुहूर्त्तश्च।
- वापीकूपतडागादिमुहूर्त्तः।
- वृक्ष-कूप-तडागादिचक्रविचारः।

अन्वितिः ३. गृहप्रवेशविचारः। **श्रेयोऽङ्कः १**

- गृहप्रवेशस्य भेदाः।
- अपूर्वगृहप्रवेशमुहूर्त्तः।
